# श्री राम अष्टोत्तरनामावली

ओं श्रीरामाय नमः ।
ओं रामभद्राय नमः ।
ओं रामचन्द्राय नमः ।
ओं शाश्वताय नमः ।
ओं राजीवलोचनाय नमः ।
ओं श्रीमते नमः ।
ओं राजेन्द्राय नमः ।
ओं रघुपुङ्गवाय नमः ।
ओं जानकीवल्लभाय नमः । ९

ओं जैत्राय नमः ।
ओं जितामित्राय नमः ।
ओं जनार्दनाय नमः ।
ओं विश्वामित्रप्रियाय नमः ।
ओं दान्ताय नमः ।
ओं शरणत्राणतत्पराय नमः ।
ओं वालिप्रमथनाय नमः ।
ओं वाग्मिने नमः ।
ओं सत्यवाचे नमः । १८

ओं सत्यविक्रमाय नमः ।
ओं सत्यव्रताय नमः ।
ओं व्रतधराय नमः ।
ओं सदाहनुमदाश्रिताय नमः ।
ओं कौसलेयाय नमः ।
ओं खरध्वंसिने नमः ।
ओं विराधवधपण्डिताय नमः ।
ओं विभीषणपरित्रात्रे नमः ।
ओं हरकोदण्डखण्डनाय नमः । २७

ओं सप्ततालप्रभेत्त्रे नमः ।
ओं दशग्रीवशिरोहराय नमः ।
ओं जामदग्न्यमहादर्पदलनाय नमः ।
ओं ताटकान्तकाय नमः ।
ओं वेदान्तसाराय नमः ।
ओं वेदात्मने नमः ।
ओं भवरोगस्यभेषजाय नमः ।
ओं दूषणत्रिशिरोहन्त्रे नमः ।
ओं त्रिमूर्तये नमः । ३६

ओं त्रिगुणात्मकाय नमः ।
ओं त्रिविक्रमाय नमः ।
ओं त्रिलोकात्मने नमः ।
ओं पुण्यचारित्रकीर्तनाय नमः ।
ओं त्रिलोकरक्षकाय नमः ।
ओं धन्विने नमः ।
ओं दण्डकारण्यकर्तनाय नमः ।
ओं अहल्याशापशमनाय नमः ।
ओं पितृभक्ताय नमः । ४५

eAstroHelp

ओं वरप्रदाय नमः ।
ओं जितेन्द्रियाय नमः ।
ओं जितक्रोधाय नमः ।
ओं जितामित्राय नमः ।
ओं जगद्गुरवे नमः ।
ओं ऋक्षवानरसङ्घातिने नमः ।
ओं चित्रकूटसमाश्रयाय नमः ।
ओं जयन्तत्राणवरदाय नमः ।
ओं सुमित्रापुत्रसेविताय नमः । ५४

ओं सर्वदेवाधिदेवाय नमः ।
ओं मृतवानरजीवनाय नमः ।
ओं मायामारीचहन्त्रे नमः ।
ओं महादेवाय नमः ।
ओं महाभुजाय नमः ।
ओं सर्वदेवस्तुताय नमः ।
ओं सौम्याय नमः ।
ओं ब्रह्मण्याय नमः ।
ओं मुनिसंस्तुताय नमः । ६३

ओं महायोगिने नमः ।
ओं महोदाराय नमः ।
ओं सुग्रीवेप्सितराज्यदाय नमः ।
ओं सर्वपुण्याधिकफलाय नमः ।
ओं स्मृतसर्वाघनाशनाय नमः ।
ओं आदिपुरुषाय नमः ।
ओं परमपुरुषाय नमः ।
ओं महापुरुषाय नमः ।
ओं पुण्योदयाय नमः । ७२

ओं दयासाराय नमः ।
ओं पुराणपुरुषोत्तमाय नमः ।
ओं स्मितवक्त्राय नमः ।
ओं मितभाषिणे नमः ।
ओं पूर्वभाषिणे नमः ।
ओं राघवाय नमः ।
ओं अनन्तगुणगम्भीराय नमः ।
ओं धीरोदात्तगुणोत्तमाय नमः ।
ओं मायामानुषचारित्राय नमः । ८१

ओं महादेवादिपूजिताय नमः ।
ओं सेतुकृते नमः ।
ओं जितवाराशये नमः ।
ओं सर्वतीर्थमयाय नमः ।
ओं हरये नमः ।
ओं श्यामाङ्गाय नमः ।
ओं सुन्दराय नमः ।
ओं शूराय नमः ।
ओं पीतवाससे नमः । ९०

eAstroHelp

ओं धनुर्धराय नमः ।
ओं सर्वयज्ञाधिपाय नमः ।
ओं यज्विने नमः ।
ओं जरामरणवर्जिताय नमः ।
ओं विभीषणप्रतिष्ठात्रे नमः ।
ओं सर्वावगुणवर्जिताय नमः ।
ओं परमात्मने नमः ।
ओं परस्मै ब्रह्मणे नमः ।
ओं सच्चिदानन्दविग्रहाय नमः । ९९

ओं परस्मै ज्योतिषे नमः ।
ओं परस्मै धाम्ने नमः ।
ओं पराकाशाय नमः ।
ओं परात्पराय नमः ।
ओं परेशाय नमः ।
ओं पारगाय नमः ।
ओं पाराय नमः ।
ओं सर्वदेवात्मकाय नमः ।
ओं परस्मै नमः । १०८

इति श्री राम अष्टोत्तरनामावली ||

eAstroHelp